*No. of pages - 16* **(E)**

# PRE-BOARD EXAMINATION 2019-20
## CLASS : X
## SUBJECT: SANSKRIT

**Time Allowed : 3 hours** **Maximum Marks : 80**

**सामान्य-निर्देशाः**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।
- प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
- उत्तरलेखनात् पूर्वं प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्:**

- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
- खण्डः (क) - अपठितांश-अवबोधनम् - 10 अंक
- खण्डः (ख) - रचनात्मक-कार्यम् - 15 अंक
- खण्डः (ग) - अनुप्रयुक्त-व्याकरणम् - 25 अंक
- खण्डः (घ) - पठितांश-अवबोधनम् - 30 अंक

****************



WWW.TAYARIONLINE.COM
Scanned with CamScanner

## खण्डः-क

## अपठितांश-अवबोधनम्

1. अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

महान् स्वतन्त्रतासेनानी स्वतन्त्रभारतस्य प्रथमः उपप्रधानमन्त्री गृहमन्त्री च लौहपुरुषः सरदारवल्लभभाई-पटेलमहोदयः 1875तमे वर्षे अक्टूबरमासस्य एकत्रिंशत् तारिकायां जन्म अलभत। प्रान्तानाम् एकीकरणे केन्द्रीयभूमिकां निर्वहन् पटेलमहोदयः अद्यापि सर्वेषां भारतवासिनां श्रद्धाभाजनः। पटेलमहोदयं प्रति कृतज्ञतां प्रकटयितुं गुजरातप्रान्तस्य तत्कालीनः मुख्यमन्त्री नरेन्द्रमोदीमहोदयः 2013तमे वर्षे अक्तूबरमासस्य एकत्रिंशत् तारिकायां तस्य मूर्तेः शिलान्यासं कृतवान्। अस्याः विशालकायायाः मूर्तेः निर्माणे पञ्चवर्षाणां कालः उपयुक्तः। तस्यैव जन्मदिवसे अक्तूबरमासस्य एकत्रिंशत् दिनाङ्के एव भारतस्य प्रधानमन्त्रिणा नरेन्द्रमोदीमहोदयेन मूर्तिरियं राष्ट्राय समर्पिता। इयं प्रतिमा एकतायाः मूर्तिः (स्टैच्यू ऑफ़ लिबर्टी) इति नाम्ना ख्याता अस्ति। इदं स्मारकं सरदार-सरोवरबन्धतः प्रायशः त्रिकिलोमीटरमितं दूरे साधूबेरनामके उपद्वीपे स्थितमस्ति। अस्याः प्रतिमायाः उच्चता द्व्यशीत्यधिकशत-मीटरमितम् अस्ति। इयं विश्वस्य उच्चतमा मूर्तिः अस्ति। मूर्तेः उच्चता पटेलमहोदयस्य व्यक्तित्वस्य कृतित्वस्य च उच्चतायाः सूचिका वतते।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

i. भारतस्य प्रथमः उपप्रधानमन्त्री गृहमन्त्री च कः आसीत्?

ii. पटेलमहोदयः कस्मिन् केन्द्रीयभूमिका निर्वाहितवान्?

iii. नरेन्द्रमोदीमहोदयेन मूर्तिः कस्मै समर्पिता?

ब. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 2×2=4

i. कः सर्वेषां भारतीयानां श्रद्धाभाजनः?

ii. मूर्तेः उच्चता किं सूचयति?



WWW.TAYARIONLINE.COM

Scanned with CamScanner

iii. पटेलमहोदयस्यं प्रतिमा केन नाम्ना ख्याता?

स. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1×1=1

द. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) 1×3=3

i. 'महान् स्वतन्त्रतासेनानी' इत्यनयोः पदयोः किं विशेष्यपदम्?

क. महान् ख. स्वतन्त्रतासेनानी

ग. स्वतन्त्रभारतस्य

ii. 'तस्यैव जन्मदिवसे समर्पिता' इत्यस्मिन् वाक्ये 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

क. पटेलमहोदयाय ख. नरेन्द्रमोदीमहोदयाय

ग. उभयोः

iii. 'समीपे' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत।

क. दिनाङ्के ख. निकट

ग. दूरे

iv. 'महान् स्वतन्त्रतासेनानी जन्म अलभत' इत्यस्मिन् वाक्ये किं क्रियापदम्?

क. स्वतन्त्रतासेनानी ख. अलभत

ग. जन्म

## खण्डः-ख

## रचनात्मक-कार्यम्

2. प्रतियोगिपरीक्षायाः सन्नद्धीकरणाय आरम्भतः एव सामान्यज्ञानस्य अभ्यासः करणीयः इति उपादिशन् पित्रा पुत्रं प्रति लिखिते अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत - ½×10=5



WWW.TAYARIONLINE.COM

Scanned with CamScanner

प्रयागतः

दिनांकः ................

प्रिय पुत्र अविनाश!

शुभाशिषो लसन्तु।

आशासे त्वं सकुशलः (i) ................ रतः असि। पुत्र! अहं जानामि परीक्षायां तव (ii) ................ शोभना भवति। त्वं प्रतिवर्षं कक्षायां प्रथमं (iii) ................ प्राप्नोषि इति अहं जानामि। ग्रीष्मावकाशे त्वं कथितवान् यत् तव (iv) ................ प्रतियोगिपरीक्षामुत्तीर्य सलोकसेवा-आयोगक्षेत्रे (v) ................ अस्ति। पुत्र! एतल्लक्ष्यं (vi) ................ बाल्यकालादेव (vii) ................ अध्ययनं करणीयम् अतएव विषयस्य अभ्यासेन समम् एकहोरापर्यन्तं सामान्यज्ञानं वर्धयितुं प्रतिदिनं सामाचारपत्रं पठ। यदि अधुनातः एतल्लक्ष्यं प्राप्तुं नियमितम् (viii) ................ करिष्यसि नूनमेव साफल्यं लप्स्यसे। यदि काऽपि सहायता (ix) ................ तर्हि अहम् करिष्यामि।

तव (x ................)

आशीषकुमारः

मंजूषा

| |
|---|
| जनकः, अध्ययनं, प्राप्तं, स्वाध्याये, लक्ष्यं, प्रस्तुतिः, स्थानं, अपेक्षिता, सेवाप्रदानम्, सामान्यज्ञानस्य |

3. अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत – 1×5=5





WWW.TAYARIONLINE.COM

Scanned with CamScanner

मंजूषा

| |
|---|
| उदग्रविमानम्, सैनिकः, भोजनपुटकानि, जलौघपीड़िताः, वृद्धस्य, लम्बितसोपाने, आरोहयति, पातयन्ति, सहायताम्, छदिषु, उत्थापयन्ति |

अथवा

मंजूषायां प्रदत्तपदानां सहायतया निम्नलिखितं विषयम् अधिकृत्य पंचभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।

**"पुस्तकम्"**

मंजूषा

| |
|---|
| पुस्तकम्, ज्ञानम्, शास्त्रम्, विद्यालये, अध्ययनं, स्वाध्यायः, प्रतिदिनम्, पठनीयम्, स्मरणम्, मौनवाचनम्, पारायणम्, कण्ठस्थः, करणीयम्, प्राप्यते, विज्ञानम् |

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनुद्य लिखत - (केवलं वाक्यपंचकम) 1×5=5

i. हे सुरेश! झूठ मत बोलो। Dear Suresh! Don't lie.

ii. पिता जी भिक्षुक को धन देते हैं। Father gives money to beggar.

iii. धन के बिना जीवन व्यर्थ है। Life is futile without Money.

iv. राधा गीत गा रही है। Radha is singing a song.

v. तुम कहाँ जा रहे हो? Where are you going?

vi. पटना बिहार की राजधानी है। Patna is the capital of Bihar.



WWW.TAYARIONLINE.COM
Scanned with CamScanner

## खण्डः-ग

## अनुप्रयुक्त-व्याकरणम्

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं/विच्छेदं वा कुरुत - (केवलं प्रश्नचतुष्टयम्)

i. मीनो नु हन्त कतमां गतिमभ्युपैति। 1×4=4

ii. अलमाशङ्कया।

iii. चन्दनदासमिदानीं द्रष्टुमिच्छामि।

iv. विस्फोटैः+अपि भूकम्पो जायत।

v. अनुक्तम्+अपि उहति पण्डितः।

6. अधोलिखितवाक्येषु रेखांकितपदानां समास-विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 1×4=4

i. 'पार्वत्याः पतिः नीलकण्ठः वर्तते' इत्यस्य विग्रहवाक्यं किम्?

क. नीलः कण्ठः     ख. नीलः कण्ठः यस्य सः

ग. नीलम् कण्ठम् यस्य सः

ii. 'बली बलं वेत्ति न वेत्ति निर्बलः' इत्यस्य विग्रहवाक्यं किम्?

क. निः बलः     ख. निर् बलः

ग. निर्गतः बलः यस्मात् सः

iii. 'अयोध्यायाः महाराजः रामः आसीत्' इत्यस्य विग्रहवाक्यं किम्?

क. महान् चासौ राजा     ख. महान् राजन्

ग. महा राजन्



WWW.TAYARIONLINE.COM

Scanned with CamScanner

iv. '<u>दश आननानि यस्य सः</u> रावणः लङ्कायाः राजा आसीत्' इत्यस्य समस्तपदं किम्?

क. दशाननः    ख. दशानना:

ग. दशाननम्

v. '<u>रामः च लक्ष्मणः च</u>' इत्यस्य समस्तपदं किम्?

क. रामलक्ष्मणः    ख. रामलक्ष्मणौ

ग. रामलक्ष्मणम्

7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्यय संयोज्य विभज्य वा उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) 1×4=4

i. <u>बलवान्</u> रक्षकः चौरं ताडयति।

क. बल+शतृ    ख. बल+मतुप्

ग. बल+शानच्

ii. <u>विद्वत्त्वं</u> च नृपत्वं च नैव तुल्यं कदाचन।

क. विद्वस्+त्वम्    ख. विद्वस्+त्व

ग. विद्वस्+तवम्

iii. <u>सेविका</u> गृहकार्यं करोति।

क. सेविक+टाप्    ख. सेवक+टाप्

ग. सेव+इका

iv. बालकानां <u>चपलत्वं</u> अतिशोभनम् भवति।

क. चपल+त्व    ख. चपल+त्व

ग. चपल+त्वत्



WWW.TAYARIONLINE.COM
Scanned with CamScanner

v. <u>क्रूरता</u> मानवाया न शोभते।

क. क्रूर+तल् ख. क्रूरत+टाप्

ग. क्रूर+ताल्

8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत – (केवलं त्रयाणाम्) 1×4=4

| त्वया, पुस्तकानि, ग्रन्थम् |
|---|

कृष्णः – किं छात्राः पुस्तकालये पुस्तकानि पठन्ति?

बलरामः – आम्! तैः .................. पठ्यन्ते।

रामः – किं .................. ग्रन्थः पठितः।

सीता – आम्! अहम् .................. पठितवती?

अथवा

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत – (केवलं त्रयाणाम्)

क. बालकः पाठं पठति।

ख. त्वया किं क्रियते?

ग. तया गीतं गीयते।

9. कालबोधकशब्दैः अधोलिखित-दिनचर्यां पूरयत – (केवलं प्रश्नचतुष्टयम्) 1×4=4

i. माता प्रातः .................. (5:00) वादने उत्तिष्ठति।

ii. राहुलः प्रातः भ्रमणाय .................. (6:15) वादने उद्याने गच्छति।

iii. मल्लिका .................. (7:30) वादने प्रातराशं करोति।

iv. अनन्या .................. (5:45) वादने क्रीडति।

v. अस्माभिः .................. (10:00) वादने शयनं करणीयम्।



WWW.TAYARIONLINE.COM

Scanned with CamScanner

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नषट्कम्) ½×6=3

i. अवकराः ................ विकीर्णाः सन्ति?

ii. त्वम् ................. आगच्छ।

iii. यथा रामः तथा श्यामः ................. वीरः आसीत्।

iv. कच्छपः ................ चलति।

v. यदि सः पठिष्यति ................. सफलः भविष्यति।

vi. मूर्खाः ................ कलहं कुर्वन्ति।

vii. ................. दिल्लीराज्यस्य शिक्षामन्त्री श्रीमनीषसिशोदिया अस्ति।

viii. विद्यालये ................ समारोहः अभवत्।

मञ्जूषा

| |
|---|
| ह्यः, सम्प्रति, वृथा, शनैः, अपि, अत्र, तर्हि, इतस्ततः |

11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नत्रयम्) 1×3=3

i. <u>ते</u> बालिकाः बुद्धिमत्यः सन्ति।

क. ताः ख. सा

ग. तौ

ii. <u>ते</u> मम मित्राणि सन्ति।

क. सः ख. तानि

ग. तौ



WWW.TIYARIONLINE.COM

Scanned with CamScanner

iii. अहं तत्र गमिष्यामः।

क. गमिष्यति    ख. गमिष्यामि

ग. गमिष्यसि

iv. खगानि आकाशे उड्डयन्ति।

क. खगा    ख. खगः

ग. खगाः

## खण्डः-घ

## पठितांश-अवबोधनम्

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपटेया प्रहृत्य जगाद–"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

अ. एकवाक्येन उत्तरत– ½×2=1

i. ग्रामस्य नाम किम् अस्ति?

ii. बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता?

ब. पूर्णवाक्येन उत्तरत – 1×1=1

i. सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

स. निर्देशानुसारम् उत्तरत – 1×3=3

i. 'जगाद' इति क्रियापदस्य कर्तृपदं किम्?

WWW.TAYARIONLINE.COM



Scanned with CamScanner

क. राजपुत्रः     ख. सा

ग. उभयम्

ii. 'भार्या' इति पदस्य विशेषणपदं किम्?

क. तस्य     ख. बुद्धिमती

ग. एकदा

iii. 'गच्छन्तम्' इति क्रियापदस्य विपर्ययपदं गद्यांशे किम्?

क. आगच्छन्तम्     ख. आयान्तम्

ग. प्रत्यागच्छन्तम्

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

गुणी गुणं वेत्ति न वेत्ति निर्गुणो, बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः, करी च सिंहस्य बलं न मूषकः।।

अ. एकवाक्येन उत्तरत– ½×2=1

i. कीदृशः जनः गुणं न जानाति?

ii. कः वसन्तस्य गुणं जानाति?

ब. पूर्णवाक्येन उत्तरत – 1×1=1

i. पिकः किं जानाति वायसः च किं न जानाति?

स. निर्देशानुसारम् उत्तरत – 1×3=3

i. श्लोके 'जानाति' इति पदस्य पर्यायपदं किम् आगतम्?

क. बलं     ख. वेत्ति

ग. गुणं



WWW.TAYARIONLINE.COM

Scanned with CamScanner

ii. 'गुणी गुणं वेत्ति' अत्र कर्तृपदं किम्?

क. गुणी　　　　ख. गुणं

ग. वेत्ति

iii. 'निर्बलः' इति पदस्य विपर्ययपदं किम् अत्र प्रयुक्तम्?

क. बलः　　　　ख. गुणी

ग. पिकः

14. अधोलिखितं नाट्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

जम्बुकः- स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र! तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।

व्याघ्रः- शृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

जम्बुकः- यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्रः तथा कृत्वा काननं ययौ। शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती – जम्बूककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्? परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच –

रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।

विश्वास्याद्यैकमानीय कथं यासि वदाधुना।

इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।

व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः।।

एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्। अतएव उच्यते – बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।।



WWW.TAYARIONLINE.COM

Scanned with CamScanner

अ. एकवाक्येन उत्तरत- ½×2=1

i. का प्रत्युत्पन्नमतिः आसीत्?

ii. केषु बुद्धिः बलवती भवति?

ब. पूर्णवाक्येन उत्तरत - 1×1=1

i. किम् उक्त्वा व्याघ्रमारी धाविता?

स. निर्देशानुसारम् उत्तरत - 1×3=3

i. 'पश्यति' इति क्रियापदस्य समानार्थकपदं किम्?

क. ईक्षते ख. करोति

ग. दुष्करं

ii. 'विलम्बः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

क. सहितम् ख. सत्वरम्

ग. अवेला

iii. 'पुनरायान्तं व्याघ्रम्' इत्यनयोः पदयोः किं विशेषणपदम्?

क. पुनरायान्तं ख. व्याघ्रम्

ग. काननम

15. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (संपूर्णं प्रश्नवाक्यं लेखनीयम्) (केवलं चत्वारः प्रश्नाः) - 1×4=4

i. सिंहस्य बलं गजः वेत्ति मूषकः न।

ii. मयूरस्य पिच्छानां सौन्दर्यम् अपूर्वम् अस्ति।

iii. श्रेष्ठी तारस्वरेण उवाच॥



WWW.TAYARIONLINE.COM

Scanned with CamScanner

iv. परस्परविवादतः प्राणिनां <u>हानिः</u> जायते।

v. बुद्धिमती चपेटया <u>पुत्रौ</u> प्रहृतवती।

16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितयोः श्लोकयोः अन्वयं पूरयतत –

क. विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।

अश्वश्वेद् धावने वीरः भारस्य वहने खरः।।

अन्वयः – विचित्रे (i) ............. खलु किञ्चित् (ii) ............. नास्ति। अश्वः चेत् (iii) ............. वीरः (तर्हि) भारस्य वहने (iv) ............. (वीरः) अस्ति। ½×4=2

मञ्जूषा

| |
|---|
| निरर्थकम्, खरः, धावने, संसारे |

ख. यदि पुत्रसहस्रं मे सर्वत्र सममेव मे।

दीनस्य तु सतः शक्र! पुत्रस्याभ्यधिका कृपा।।

अन्वयः – शक्र! यदि मे (i)............. मे सर्वत्र (ii)............. तु दीनस्य (iii)............. सतः (iv) ............. कृपा। ½×4=2

मञ्जूषा

| |
|---|
| सममेव, अभ्यधिका, पुत्रसहस्रम्, पुत्रस्य |

अथवा

मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।



WWW.TAYARIONLINE.COM

Scanned with CamScanner

भावार्थः - अस्य भावोऽस्ति यत् सदाचारः जनानां (i) ............. धर्मः अस्ति, इति (ii) ............. कथयन्ति; अतएव जनैः (iii) ............. रक्षा प्राणेभ्यः अपि (iv) ............. करणीया।

मञ्जूषा

| विद्वांसः, विशेषतः, पथमः, सदाचारस्य |
|---|

17. अधोलिखित-कथांशं समुचितक्रमेण (घटनाक्रमानुसारेण) लिखत - ½×8=4

i. सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात।

ii. कृषकः तं दुर्बलं वृषभं तोदनेन अवर्तत।

iii. तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः आसीत्।

iv. कृषीवलः क्रुद्धः अभवत्।

v. एकः कृषकः आसीत्।

vi. तमुत्थापयितुम् बहुवारं यत्नमकरोत् तथापि सः नोत्थितः।

vii. सः जवेन गन्तुम् अशक्तः च आसीत्।

viii. तस्य समीपे द्वौ बलीवर्दौ आस्ताम्।

18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत - 1×3=3

| | क | | ख |
|---|---|---|---|
| i. | मात्रा | - | परूषः |
| ii. | पूर्वम् | - | जनन्या |
| iii. | कठोरः | - | पुरा |



WWW.TAYARIONLINE.COM

Scanned with CamScanner

अथवा

अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकुलम् उचितार्थं चित्वा लिखत -

i. अपत्येषु च सर्वेषु जननी तुल्यवत्सला।

क. दुष्टेषु    ख. पुत्रेषु

ग. सज्जनेषु

ii. मार्गे गहने कानने सा एकं व्याघ्रं ददर्श।

क. गर्ते    ख. गगने

ग. घने

iii. भारस्य वहने खरः वीरः।

क. अश्वः    ख. गर्दभः

ग. गजः

WWW.TAYARIONLINE.COM



Scanned with CamScanner